स्यलक्षणः किन्तु जन्यजनकत्वादिरूपोऽपीति हरदत्तः तेन केकयीति सिद्धम्। देवकराजकन्याभेदे देवकशब्दे दृश्यम्। देवकी च कश्यपपत्न्या अदितेरवतारः यथोक्तं हरिवं० ५६अ० "तस्य (कश्यपस्य) भार्याद्वयञ्चैव अदितिः सुरभिस्तथा। देवकी रोहिणी चैव वसुदेवस्य धीमतः"

**देवकीनन्दन** पु० ६त०। वसुदेवपत्न्या देवक्यानन्दने श्रीकृष्णे। "नन्दगोपस्य जायैका वसुदेवस्य चापरा। तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा। देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम्। मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते" हरिवं० ६०अ० "देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः" विष्णुसं० "गृहीत्वा हरणं प्राप्ते कृष्णे देवकिनन्दने" भा०आ० १अ० संज्ञात्वात् ङीपो ह्रस्वः। [नुगिष्टः कुक् च। देवसम्बन्धिनि।

**देवकीय** त्रि० देवस्येदम् गहा० छ "देवस्य च" पा०ग०तद्-

**देवकीपुत्र** पु० ६त०। १श्रीकृष्णे "बलवांश्चैव दास्यामि देवकीपुत्रमाश्रितः" हरिवं० १४२अ०। २पुरुषयज्ञदर्शनविद्यायां घोरनामकाङ्गिरसस्य शिष्यभूते कृष्णे च। यज्ञदर्शनमुपक्रम्य "तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचाऽपिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति" छा०उ० ३।१७।६ "तद्धैतत् यज्ञदर्शनं घोरोनामतः, आङ्गिरसो गोत्रतः कृष्णाय देवकीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादि व्यवहितेन सम्बन्धः। स चैतद्दर्शनं श्रुत्वाऽपिपास एवान्याभ्यो विद्याभ्यो बभूव। इत्यञ्च विशिष्टेयं विद्या यत् कृष्णस्य देवकीपुत्रस्यान्यां विद्यां प्रति तृड्विच्छेदकरीति पुरुषयज्ञविद्यां स्तौति घोर अङ्गिरसः कृष्णायोक्त्वेमां विद्यां किमुवाचेति तदाह स एवं यथोक्तयज्ञविदन्तवेलायां मरणकाल एतन्मन्त्रत्रयं प्रतिपद्येत जपेदित्यर्थः। किं तत् अक्षितमक्षीणमक्षतं वाऽसीत्येकं यजुः" भा० अत्र परमेश्वरस्य वासुदेवात्मकेश्वरस्य अन्यशिष्यत्वानुपपत्तौ इह तदन्यस्यैव शिष्यत्वम्। श्रुतौ सृष्टेः अनादिप्रवाहरूपतया वासुदेवस्य शिष्यत्वकल्पनया जनकयाज्ञवल्क्ययोरिव कल्पान्तरस्थयोरियमाख्यायिका स्तुत्यर्थेत्यन्ये। देवकीसुतादयोऽपि वासुदेवे। "अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे। अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ति०त० ब्रह्मपु० "न्याधाय्यिषातामभिदेवकीसुतम्" माघः।

**देवकीमातृ** पु० देवकी माता यस्य समासान्तविधेरनित्यत्वात् न कप्, देवकीं मिनोति प्रसूतित्वेन मा—तृच् वा। वासुदेवे श्रीकृष्णे। "पश्यैतान् देवकीमातर्मृद्नद्य संयुगे" भा०द्रो० १८अ० प्रथमे विग्रहे सर्वनामस्थाने परे गुणः देवकीमातरमित्यादि द्वितीये देवकीमातारमिति भेदः।

**देवकुण्ड** न० देवकृतं कुण्डम्। देवखातके सुभूतिः

**देवकुरुम्बा** स्त्री महाद्रोण्यां राजनि०।

**देवकुल** न० कुल—संहतौ क देवार्थं कुलमल्पद्वारतया संहतम्। अल्पमुखे (देउल) ख्याते देवगृहभेदे हारा०। देवानां २वंशे ३समूहे च

**देवकुल्या** स्त्री देवकृता कुल्या अल्पसरित्। १देवसरिति गङ्गायाम् ६त०। मरीचः कन्यायाः पूर्णिमासः २कन्यायाञ्च "पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पूर्णिमासञ्च ययोरापूरितं जगत्। पूर्णिमासूत विरजं विश्वगञ्च परन्तप। देवकुल्यां हरेः पादशौचाद्याऽभूत् सरिद्दिवः" भाग०४।१।१२। सा च भरतवंश्यस्य भूम्नः पत्नीभेदः यथाह भाग० ५।१५।६ "भरतस्यात्मजः सुमतिर्नाम" इत्युपक्रमे "प्रतिहर्त्तुः स्तुत्यामजभूमानावजनिषाताम्। भूम्न ऋषिकुल्यायामुद्गीथः ततः प्रस्तारो देवकुल्यायाम्"।

**देवकुसुम** न० देवप्रियं कुसुमम्। लवङ्गे अमरः।

**देवकूट** न० वशिष्ठाश्रमसन्निकृष्टस्थे तीर्थभेदे "तत्राश्रमो वशिष्ठस्य त्रिषु लोकेषु विश्रुतः। तत्राभिषेकं कुर्वाणो वाजपेयमवाप्नुयात्। देवकूटं समासाद्य देवर्षिगणसेवितम्" भा०व० ८४अ०।

**देवक्षत्र** पु० क्रोष्टुवंश्ये नृपभेदे "तस्मात् करम्भः कारम्भिर्देवरातोऽभवन्नृपः!। देवक्षत्रोऽभवत्तस्य दैवक्षत्रिर्महायशाः। देववर्णसमो जज्ञे देवक्षत्रस्य नन्दनः" हरिवं० ३७अ०। देवानां क्षत्रं बलं यत्र। २यज्ञे च "उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि" ऋ० ५।६४।७ "देवक्षत्रे यज्ञे" भा०।

**देवखात** न० देवेन खातं खन—क्त। १अकृत्रिमे २जलाशये ७त०। ३देवसमीपस्थे खाते च "नदीषु देवखातेषु तडागेषु सरित्सु च। स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" मनुः स्वार्थे क तत्रार्थे अमरः। ४गुहायां भरतः।

**देवखातबिल** पु० नित्यकर्म०। गुहायाम् अमरः।

**देवगण** पु० ६त०। १देवसमूहे "उदर्कस्तव कल्याणि! तुष्टो देवगणेश्वरः" भा०भी० १२२अ०। देवगणाश्च त्रयस्त्रिंशत्प्रतिशब्दे २३५९ पृ० उक्ताः वस्वादीनुक्त्वा "त्रयस्त्रिंशत